Gyanshauryam, International Scientific Refereed Research Journal
© 2023 GISRRJ | Volume 6 | Issue 1 | ISSN : 2582-0095

# श्रीरामकृष्णनये भावमुखस्थिति:

Biswarup Bej
Research Scholar, National Sanskrit University, Tirupati, India

**Article Info**
**Publication Issue :**
Volume 6, Issue 1
January-February-2023
**Page Number :** 63-67
**Article History**
Accepted : 01 Feb 2023
Published : 25 Feb 2023

**शोधसारांश:** - अवतारवरीष्ठ:श्रीरामकृष्णपरमहंस: सर्वविधसाधनां कृत्वा परब्रह्मण: साक्षात्कारं प्राप्तवान्। स: लोकसंग्रहार्थं धरायाम् अवतरणमकरोत्। तन्मते साधका: त्रैविधा:। यथा – भक्त:, ज्ञानी, विज्ञानी चेति। एतेषु भक्त:भक्तिशास्त्रोक्तमार्गेण साधनां कृत्वा तदिष्टेण सह मिलति अथवा सविकल्पसमाधिमाप्नोति। ज्ञानी तु निर्विशेषस्य अनुसन्धाने निमग्न: तिष्ठति। ज्ञानी ज्ञानमार्गे साधनां कृत्वा पूर्णतां प्राप्तुं प्रयतते। विज्ञानी एताभ्यां विशिष्टं वर्तते। ज्ञानीन: अनुभव: ब्रह्म सत्यं जगन्मिथ्या परन्तु विज्ञानीन: अनुभव: भवति ब्रह्म एव नित्यं वस्तु जगदिदं तस्य लीलामात्रम्। विज्ञानीन: एषा स्थिति: श्रीरामकृष्णनये भावमुखस्थितिरित्युच्यते इति शम्।

**मुख्यशब्दा:** – भक्त:, ज्ञानी, विज्ञानी, अवतार:, भावमुखस्थिति:, ज्ञानम्, अज्ञानं, लोकसंग्रह:।

**भूमिका** - श्रीरामकृष्णस्य जीवने नानादिव्यभावानां समावेश: दरीदृश्यते। वैदान्तिकानां पार्श्वे स: वेदान्ती आसीत्, भक्तिवादिनां निकटे स: अवतारपुरुष: आसीत्। शाक्तानां वैष्णवानां शैवानां तथा तदानीन्तनसमयस्य ब्राह्मसमाजान्तर्गतानां निकटेऽपि स: अभीष्ट:आसीत्। साधनानन्तरकाले श्रीरामकृष्णस्य अहंत्वबुद्धि: कदाचित् लुप्ता कदाचिद्वा ईषत्प्रकाशिता भवति स्म। तदा श्रीरामकृष्णसकाशे जगत् भिन्नरूपेण प्रतीयते स्म। यथा वयं जगत् नानारूपै: नानानामभि: पश्याम: तथा नासीत्।श्रीरामकृष्ण: अनुभवति स्म यथा एकस्मिन् विराट्मनसि नानाभावतरङ्गानि उत्पन्नानि भवन्ति, तरन्ति, क्रीडन्ति पुन: लयं प्राप्नुवन्ति। श्रीरामकृष्ण: स्वस्य शरीरं मन: तथा अहंत्वमित्यादिकं विराट्मनसि तरङ्गत्वेन पश्यति स्म। पाश्चात्या: पण्डितमन्या: यं जगच्चैतन्यं शक्तिं वा स्वबुद्ध्या बुद्धिप्रसूतयन्त्रै: च परिगणयितुमुद्युक्ता: 'एकं स्थितेऽपि तत् जडम्' इति वदन्ति तदेव श्रीरामकृष्ण: तामवस्थां संप्राप्य सजीवत्वेन, जाग्रतत्वेन, एकमेवाद्वितीयत्वेन, अनन्तकृपामयीजगज्जननीत्वेन च दृष्टवान्। द्वादशवर्षात्मकालौकिकतपस्यान्ते श्रीश्रीजगदम्बा अथवा या विराट्शक्ति: जगद्रूपेण भासते, या आब्रह्मस्तम्बपर्यन्तं सर्वेषु जडेषु जीवेषु च अनुप्रविश्य आपातरूपेण नानानामरूपै: प्रकटीभूता वर्तते, सा श्रीरामकृष्णं 'भावमुखे तिष्ठ' इति आदिष्टवती।

**श्रीरामकृष्णनये साधकानां त्रैविध्यम्** - श्रीरामकृष्ण: साधकानां चरित्राणुसारेण त्रैविध्यं असूचयत्। यथा – भक्त:, ज्ञानी, विज्ञानी चेति। एतेषु विज्ञानी भवति सर्वोत्तम:। ज्ञानमार्गस्य भक्तिमार्गस्य च लक्षणानि अनुभवाश्च एकीभूता: सन्ति विज्ञानीन: चरित्रे। विज्ञानी कदाचित् ज्ञानीवत् कदाचिद्वा भक्तवद्व्यवहरति। भक्त: नारदीयभक्तिसूत्रं भागवतपुराणम् इत्यादिभक्तिशास्त्रोक्तमार्गेण साधनां कृत्वा तदिष्टेण सह मिलति अथवा सविकल्पसमाधिमाप्नोति। तथापि तस्य अहंभाव: नापसरति। स: पूजां, प्रार्थनां, तीर्थभ्रमणम् इत्यादिकं सम्पाद्य भक्तजीवनस्य उपभोगं करोति। एतेनैव तदिष्टेन सह तस्य

**Copyright:** © the author(s), publisher and licensee Shauryam Research Institute. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

गभीरसंयोग: सिद्ध्यति। वैष्णवशास्त्रे भक्तानां विषये उक्तं वर्तते यत् ते भक्ता: अनेनैव मार्गेण साधनां कृत्वा निर्विकल्पसमाधौ लीना: अभवन्।

ज्ञानी तु निर्विशेषस्य अनुसन्धाने निमग्न: तिष्ठति। ज्ञानी ज्ञानमार्गे साधनां कृत्वा पूर्णतां प्राप्तुं प्रयतते। ज्ञानमार्गस्य साधक: इहामूत्रफलभोगविरागस्य तथा नित्यानित्यवस्तुविवेकस्य परिपालनेन निर्विकल्पकसमाधौ सुप्रसन्नतया निविष्टो भवति। विज्ञानी एताभ्यां विशिष्टं वर्तते। यद्यपि ज्ञानमार्गेण सह विज्ञानमार्गस्य साम्यं विद्यते तथापि श्रीरामकृष्ण: उभयोर्मध्ये सुस्पष्टं भेदं दर्शितवान् यत् 'ज्ञानी 'नेति''नेति'कृत्वा विषयवुद्धिं परित्याज्य ब्रह्मप्राप्त्यर्थं यत्नं विदधाति, अन्तिमे तस्य ब्रह्मसाक्षात्कार: सञ्जायते। परन्तु य: विज्ञानी भवति, स: विशेषरूपेण तेन सह मिलति, स: इतोऽपि अधिकं पश्यति।'[1] इति। श्रीरामकृष्ण: अत्यन्तसारल्येन लौकिकोदाहरणेन उपदिशति यत् 'य: दुग्धस्य विषये केवलम् अशृणोत् तस्य अज्ञानं, य: दुग्धम् अपिबत् तस्य ज्ञानम् अभवत्। य: दुग्धं पीत्वा पुष्ट: जात: तस्य विज्ञानम् अभवत्।'[2] श्रीरामकृष्णनये निराकारवादी साकारवादी इति द्विधा परमहंसा: भवन्ति। निराकारवादिन: साकारं निराकृत्य केवलमात्रं निराकारपरब्रह्मणि लीना: तिष्ठन्ति। एते 'ज्ञानी'इति पर्यायान्तर्गता:। परन्तु ये साकारं निराकारञ्चोभयं स्वीकृत्य तिष्ठन्ति ते 'विज्ञानी'इति उच्यन्ते। विज्ञानीपरमहंसा: यदा पूजादिकं उपासनादिकम् आचरन्ति, तदा प्रचलितनियमान् न परिपालयन्ति। यतो हि ते जानन्ति यत् इष्टेण सह तस्य वैरुद्ध्यं नास्ति। उभयो: एकात्मज्ञानं तेषु सर्वदा जागरितं तिष्ठति।

श्रीरामकृष्णस्य जीवने एवंविधयो: परमहंसद्वयो: साक्षात्कार: अभवत्। स्वामिसारदानन्द: तस्य महाग्रन्थे 'श्रीश्रीरामकृष्णलीलाप्रसङ्गे' वर्णितवान् यत् एकदा दक्षिणेश्वरे एक: सन्न्यासी आगतवान्। स: प्रत्यहं प्रात:काले सायंकाले च गङ्गाया: समीपम् आगत्य अत्यन्तनिपुणतया पारिपार्शिकपरिवेशं निरीक्षयति स्म। पार्श्वस्थवृक्षान् नदीं विहगान् आकाशम् इत्यादिकं दृष्ट्वा प्रभूतमानन्दमनुभवति स्म। आनन्दरसपाने मत्त: सन् हसन्मुखो भूत्वा नृत्यति स्म।

तत: परं कदाचित् एक: सज्जन: उपस्थितोऽभवत्। स: विवस्त्र: धुलिमयगात्र: उन्मत्तवदासीत्। एषोऽपि सदानन्दमय: आसीत्। एकदा स: कुक्कुरेण सह मिलित्वा उच्छिष्टभक्षणं कुर्वन्नासीत्। एतद्दृष्ट्वा श्रीरामकृष्ण: तं परमहंसत्वेन ज्ञातवान्। हृदय: एतत् कथनं श्रूत्वा साधुम् अनुसृतवान्। तस्य परमहंसस्य पृष्ठत: गच्छन् हृदय: 'कथं ईश्वर: प्राप्यते'इति ज्ञातुम् आग्रहम् अप्रकटयत्। आदौ स: साधु: न किमपि उत्तरम् अयच्छत्। तत: अग्रे हृदयमुद्दिश्य नालिकाया: जलं प्रदर्शयन् अकथयत् यत् 'यदा अस्या: नालिकाया: जलं किञ्च तद्गङ्गाया: जलं समानमितिज्ञास्यते, समानं पवित्रमिति ज्ञास्यते, तदा प्राप्यते'[3] इति। तथा हि अवधूतस्य व्यवहारे लिखित: विख्यातश्लोक: वर्तते –

**परमानन्दपूर्णोऽहं संसरामि किमिच्छया।**

**अनुतिष्ठन्तु कर्माणि परलोकयियासव:॥**[4]

---

1 श्रीश्रीरामकृष्णकथामृत – पृष्ठासंख्या - 391

2 श्रीश्रीरामकृष्णकथामृत – पृष्ठासंख्या - 402

3 श्रीश्रीरामकृष्णलीलाप्रसङ्ग – द्वितीयभाग: – पृष्ठासंख्या – 48-49

4 अवधूतोपनिषत् – 14

ये तावत् प्रभूतं साधनां कृत्वा विज्ञानी अभवन् ते साधारणतः समानमेव चिन्तयन्ति। परन्तु अवतारः आधिकारिकपुरुषश्च यः विज्ञान्यवस्थां प्राप्तवान् सः प्रायः द्वैतसत्तायां वासं करोति। स्वस्य विज्ञानीसत्तां निरवचिछिन्नं संस्थाप्य लोकसंग्रहार्थं मायासमन्वितं जगत् प्रति आगच्छति।

'नारदपरिब्राजकोपनिषत्' इत्यत्र सूच्चब्रह्मविज्ञानीनः अवस्थायाः वर्णना उपलभ्यते –

**न विधिर्न निषेधश्च न वर्ज्यावर्जकल्पना।**

**ब्रह्मविज्ञानिनामस्ति तथा नान्यच्च नारद।।**[5]

तथा हि महाभारतभाषया वक्तुं शक्यते यत् –

**ज्ञानविज्ञानिनः केचित् परं पारं तितीर्षवः।**

**अतीव तत्सदा पुण्यं पुण्याभिजनसंहितम्।।**[6]

**श्रीरामकृष्णस्य विज्ञानानुभुतिः तथा भावमुखस्थितिः**– श्रीरामकृष्णः वदति स्म यत् ज्ञानलाभानन्तरं विज्ञानी प्रायः भक्तरूपेण विचरति। परन्तु यः ज्ञानी भवति सः ज्ञानं प्राप्य पुनः भक्तस्य स्तरं प्रति अवतर्तुं न शक्नोति। विज्ञानीनः समीपे उच्चस्तरनिम्नस्तरयोः विभेदः न वर्तते। तथा ह्युक्तमस्ति भगवता श्रीमच्छङ्कराचार्येण यत् 'न अन्यो भगवतो वासुदेवात् परोऽस्ति, अतः सः एव नो गतिरित्येवं निश्चिता अव्यभिचारिणी बुद्धिः अनन्ययोगः तेन, भजनं भक्तिः न व्यभिचरणशीला अव्यभिचारिणी, सा च ज्ञानम्'[7] इति। अर्थात् या भक्तिः त्रिषु कालेष्वपि अन्यथाभावं न प्राप्नोति सा भक्तिः ज्ञानमित्युच्यते। ज्ञानी ज्ञानयोगमाश्रित्य 'नेति' 'नेति' इति विचारं कृत्वा समाधौ लयं प्राप्य ब्रह्मज्ञानं प्राप्नोति। ततः तस्य ब्रह्मविषये एकनिष्ठज्ञानमुत्पद्यते। तदनन्तरं ब्रह्म सत्यं जगन्मिथ्येति प्रत्ययो सम्भवति।

तथैव विज्ञानीना अपि समाधिभूमौ सप्रपञ्चजगतः मिथ्यात्वं साक्षात्क्रियते। परन्तु समाधितः अवतरणकाले जगतः मिथ्यात्वं न स्वीक्रियते। यतो हि तस्मै जगत् ब्रह्मणः भिन्नत्वेन न दृश्यते। अतः तेन भक्तः इव आचर्यते। तथा हि खलु भगवता श्रीरामकृष्णेन सूक्तं यत् – 'एकः एव ईश्वरः जीव-जगत्-चतुर्विंशतितत्त्वानि सर्वम् अभवत्'[8] इति। विज्ञान्यवस्थायामेव एतत् सिद्ध्यति इति कारणात् विज्ञानी एव श्रेष्ठः ज्ञानी, श्रेष्ठः भक्तश्च कथ्यते। भक्तरूपेण स्थित्वा विज्ञानी जगतः शुभाशुभयोः साक्षात्कारं करोति। भक्तरूपविज्ञानी सम्पूर्णरूपेण ईश्वरानुग्रहे आत्मसमर्पणं करोति। अतः उच्यते खलु भक्तेः ज्ञानस्य च सर्वोत्तमावस्थायाः श्रेष्ठप्रतिमूर्तिः विज्ञानी। तस्यैव चिद्घनविग्रहः भगवान् श्रीरामकृष्णः, यः एकः आदर्शः विज्ञानी आसीत्।

विज्ञानी न केवलं भक्तिज्ञानयोः समन्वयं साधयति अपि तु कर्मणः योगस्य च समन्वयं साधयति। एतदेव श्रीरामकृष्णस्य जीवनचरित्रे बहूत्तमतया परिलक्ष्यते। विज्ञानीनः चरित्रे ज्ञानीनः अद्वैतानुभूतयः यथा प्रकाशन्ते तथैव उत्तमभक्तस्यापि लक्षणानि विकशन्ते। यद्यपि ज्ञानीनः भक्तस्य च चरित्रसाम्यं विज्ञानीनः जीवने दरीदृश्यते तथापि उभयोर्मध्ये

---

5 नारदपरिब्राजकोपनिषत् – 6-15

6 महाभारतम् – शान्तिपर्व – 256.23

7 श्रीमद्भगवद्गीता – 13.10

8 श्रीश्रीरामकृष्णकतामृत – पृष्ठासंख्या – 569

मौलिकविभेद: अपि सुस्पष्टं वर्तते। भक्त: भक्तिमार्गेण द्वैतमाश्रित्य सविकल्पसमाधौ लीनो भूत्वा आनन्दं प्राप्नोति। तस्मिन् भक्तचित्ते अहंभाव: त्वंभावश्च तिष्ठत:। परन्तु विज्ञानीन: चित्ते 'अयमात्मा ब्रह्म'[9] इति भाव: उद्बोधित: तिष्ठति। तेन स: इष्टं प्राप्य एकत्वं प्राप्नोति। यथा भगवत: श्रीरामकृष्णस्य अभवत्। साधनानन्तरकाले तस्य शरीरभाव: एव अप्रकाशित: जात: आसीत्। भोजनादिकं परित्यज्य तत्रैव लीनो भूत्वा कालं यापयति स्म। तस्मिन् काले तस्य शरीरग्रह: एव दुष्कर: जात:। तत्काले दक्षिणेश्वरे दैवात् कस्यचित् साधो: आगमनम् अभवत्। तत्रैव स: निवासं कृत्वा साधनायां श्रीरामकृष्णस्य साहाय्यम् आचरति स्म किञ्च समये समये बलपूर्वकं श्रीरामकृष्णं भोजयति स्म। एवंरूपेण तस्य शरीररक्षणम् अभवत्।

पर्यायेऽस्मिन् विज्ञानी सगुणनिर्गुणयो: ऐक्यं पश्यति। अत: यदा विज्ञानी ईश्वरस्य नामगुणगान-पूजा-उपासनादिकमाचरति, तदा तस्य तीव्रता द्वैतभावसम्पन्नभक्तादधिकं जायते। तथा हि खलु दृश्यते श्रीरामकृष्णस्य जीवनचरिते। यदा श्रीरामकृष्ण: श्रीश्रीजगन्मातु: कीर्तनं करोति स्म प्रायश: बाह्यज्ञानशून्यो भवति स्म। तस्मिन् महाभावकाले तस्य मन: परब्रह्मणि आच्छन्नं भूत्वा तिष्ठति स्म।

विज्ञानीस्तरे भक्ति-ज्ञान-कर्म-योग-इत्यादीनां भेदा: अपगता: भवन्ति। अत: खलु श्रीरामकृष्णस्य जीवने सर्वोच्चाद्वैतानुभुतिरपि यथा दृश्यते, तथैव दृश्यते निपुणवास्तविकताया: संमिश्रणम्। समाधे: उच्चावस्थायां स्थित्वा स: 'सर्वभूतेषु चाहं सर्वभूतानि चात्मनि'[10] इत्यस्य साक्षात्कारं कृत्वा उद्घोषितवान् यत् - 'शिवज्ञाने जीवसेवा' अर्थात् जीवेषु दयां कर्तुं न कस्यापि सामर्थं वर्तते अपि तु जीवेषु सेवां एव कर्तुं शक्यते।

ज्ञानीन: दृष्टिस्तु ब्रह्म सत्यं जगन्मिथ्या। परन्तु विज्ञानी श्रीरामकृष्ण: इदं जगत् सत्यमिति अवोचत्। ज्ञानीन: सकाशे संसारोऽयं 'धोंकार टाटि' परन्तु विज्ञानीन: सकाशे संसारोऽयं 'मजार कुटि'[11] इति। विज्ञानी ब्रह्मण: लीलात्वेन संसारं पश्यति। अर्थात् जगत् स्वरूपदृष्ट्या सत्यम् परन्तु नामरूपदृष्ट्या मिथ्या। यावत्पर्यन्तं ब्रह्मणा सह अभेदबोध: तिष्ठति तावत् सत्यं, परन्तु यदा नामरूपात्मकजगत: आविर्भाव: भवति तदा मिथ्या। श्रीरामकृष्णनये विज्ञानीन: एषा भावावस्था 'भावमुखस्थिति:' इत्युच्यते। अस्यामवस्थायां नित्यलीलयोरभेददर्शनात् श्रीरामकृष्ण: निगदति स्म 'ब्रह्म सत्यम् जगदपि सत्यम्'। श्रीरामकृष्णप्रदत्तेन लौकिकोदाहरणेन उच्यते यत् - कस्यचित् राज्ञ: सूतचतुष्टयं क्रीडति। क्रीडायां नानाविधपात्रस्य अभिनयं कुर्वन्ति ते। यथा कोऽपि मन्त्री कोऽपि वा अन्यत्। परन्तु ते तु स्वरूपत: राज्ञ: एव पुत्रा:।[12] तथैव अत्रापि जगत् जगद्रूपेण मिथ्या यतो हि स्वरूपत: ब्रह्म एव। परन्तु जगदिदं ब्रह्मरूपेण सत्यमेव। एतदृष्टि: विज्ञानीन:। तथा हि उच्यते श्रीरामकृष्णवाक्येन - 'जलं स्थिरं तिष्ठति चेदपि जलम्, अस्थिर: तिष्ठति चेदपि जलम्'[13] इति। श्रीरामकृष्ण: वदति स्म - 'ईश्वर: मानुष: सन् लीलां करोति' अर्थात् नित्यप्राप्ते: अनन्तरं विज्ञानीन: सकाशे जगल्लीलारूपेण भासते। न तु अनयोर्भेद: दृश्यते। स: इदं जगत् त्याक्त्वा केवलं ब्रह्मण: ग्रहणं न अकरोत्, अपि तु उभयं स्वीकृतवान्। तथा हि खलु दृष्टान्तेन सूचितवान् यत् - 'यथा एकं मालूरफलम्। कश्चन निर्मोकं वीजं सारञ्च पृथक् कृतवान्। मालूरफलं कियद्भारमिति जिज्ञासितमासीत्। इदानीं केवलं सारस्य परिमापणेन किं मालूरफलस्य भारज्ञानं सम्भवति? निर्मोकवीजसाराणि युगपत् परिमापणियानि' इति। तथैव ब्रह्मण: ग्रहणे सति जगत: ग्रहणं ब्रह्मरूपेण करणीयमेव न तु जगद्रूपेण। इतोऽपि स्पष्टीक्रियते

9 माण्डुक्योपनिषत् - 1.2

10 श्रीमद्भगवद्गीता - 6.29

11 श्रीश्रीरामिकृष्णकथामृत - पृष्ठासंख्या - 534

12 श्रीश्रीरामकृष्णकथामृत - पृष्ठासंख्या - 921

13 श्रीश्रीरामकृष्णकथामृत - पृष्ठासंख्या - 861

छददृष्टान्तेन यत् – 'सः पश्यति, छदः येन वस्तुना निर्मितं तदिष्टकचूणकसुरकिद्रव्यैरेव सोपाणपि निर्मितम्। नेति नेति कृत्वा यद्ब्रह्मत्वेन अववुद्धं तदेव जगद्रूपतां गतम्। विज्ञानी पश्यति, यो निर्गुणः सः एव सगुणः'[14] इति। तथैव पुष्कराद्युदाहरणैः नानाख्यानैः श्रीरामकृष्णः भावमुखस्थितिविषये स्वमतं प्रकटितवान्।

**भावमुखस्थितेः शास्त्रानुसारित्वप्रतिपादनम्** - विज्ञानी ब्रह्म नित्यं जगल्लीला इति वर्णयति। तदेव उपनिषत् सूचयति 'तत्सृष्ट्वा तदेवानुप्राविशत्'[15]। एवञ्च ब्रह्म यदनुप्रविष्टमात्मानं व्याकृतनामरूपं करोति तत्र तस्य ब्रह्मण ओतप्रोतं सर्वानुस्यूतं भावमनुभवन् तत्रैव रमते विज्ञानी। अत एव सः प्रपञ्चात् न जुगुप्स्यते। अपि तु करुणाद्रहृदयः सः जीवस्य दुःखेन क्लिश्यति, तस्य मुक्तये यतते च। विज्ञानीनः अद्वैतस्य परमतत्त्वं ज्ञात्वा लोकसंग्रहार्थं उच्चभूमितः निम्नभूमिम् अवरोहन्ति। यदा ते निम्नभूमौ विचरन्ति तदा साधारणैः सह एव तिष्ठन्ति। यथा अन्ये साधारणाः व्यवहरन्ति तथैव तेऽपि व्यवहरन्ति। अनायासेन ते लोकोद्धरार्थं अन्यान् सन्मार्गे प्रवर्तयितुं च धरायां तिष्ठन्ति। परन्तु तेषां मतिः तत्रैव परब्रह्मणि लग्ना तिष्ठति। तेषामन्तर्भावस्तु तथैव तिष्ठति यत् ब्रह्म एव नित्यं कूटस्थम् अन्यत् सर्वं तस्यैव ब्रह्मणः लीलामात्रम्। तथा ह्युक्तमस्ति श्रीमच्छङ्कराचार्येण ब्रह्मसूत्रभाष्ये – 'यथा लोके कस्यचित् आप्तैषणस्य राज्ञः राजामात्यस्य वा व्यतिरिक्तं किञ्चित् प्रयोजनमनभिसन्धाय बाह्यं किञ्चित् प्रयोजनं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति'[16] इति। अर्थात् यथा अनायासेन स्वभाववशात् श्वासोच्छासक्रिया सम्भवति तथैव ईश्वरस्यापि लीलारूपा प्रवृत्तिः सम्भवति। विज्ञानी सम्यक् जानाति यत् ब्रह्म एव सद्वस्तु अन्यत् सर्वमसत्। जगदिदं स्वरूपतः ब्रह्म एव। अतः सः स्वभावतः साधारणवत् व्यवहरति। साधारणवदेव स्वपिति, खादति, अटति इत्यादिकम् आचरति। यदा समाधौ लीनः तिष्ठति तदा ब्रह्मणि एकत्वं गच्छति, पुनः समाधौ भङ्गे सति लीलया लोकसंग्रहणाय सामान्यवद्व्यवहरति, एतदेव विज्ञानीनः वैशिष्टमिति शम्।

**सन्दर्भग्रन्थसूची**


1. श्रीमद्भगवद्गीता – प्रमथनाथ तर्कभूषण, देवसाहित्यकुटिर, कलिकाता, 1986।
2. श्रीश्रीरामकृष्णकथामृत – श्रीमकथित, उद्बोधन कार्यालय, कलकाता, 2010।
3. श्रीश्रीरामकृष्णलीलाप्रसङ्ग (भाग 1,2)– स्वामी सारदानन्द, उद्बोधन कार्यालय, कलिकाता, 1386।
4. वेदान्तदर्शन (द्वितीय अध्याय) – स्वामी विश्वरूपानन्द, उद्बोधनकार्यालय, कलिकाता, 1989।
5. तैत्तिरीयोपनिषद् – गीताप्रेस


[14] श्रीश्रीरामकृष्णकथामृत – पृष्ठासंख्या – 50–51

[15] तैत्तिरीयोपनिषद् – 2.6

[16] ब्रह्मसूत्रभाष्यम् – 2.1.33